## गद्यभाग:

# उपदेशामृतम्

*पुरा गुरुकुले आचार्याः सदाचारशिक्षानिमित्तं वेदादिभ्यः शास्त्रेभ्यः सूक्तवाक्यानि संगृह्य यदनुशासनं कुर्वन्ति स्म, तदनुशासनमेव उपदेशः । गुरोः उपदेशं प्राप्य आचरणे प्रदर्श्य च मनुष्यः अमृतत्वं लभते । संप्रति विज्ञानयुगेऽपि एतेषाम् उपदेशामृतानां प्रासङ्गिकता अस्ति । विद्यार्थिनां सुशिक्षार्थं कानिचित् उपदेशवाक्यानि अत्र प्रदत्तानि ।*

एकं सद् विप्रा बहुधा वदन्ति । ऋतस्य पथा प्रेत । अहमनृतात् सत्यमुपैमि । श्रद्धया सत्यमाप्यते ।

माता भूमिः पुत्रोऽहं पृथिव्याः । वयं राष्ट्रे जागृयाम । मित्रस्य चक्षुषा समीक्षामहे । न स सखा यो न ददाति सख्ये ।

तन्मे मनः शिवसङ्कल्पमस्तु । आरोह तमसो ज्योतिः । चरैवेति चरैवेति चरन् वै मधु विन्दति । विद्ययामृतमश्नुते ।

सत्यंवद । धर्मं चर । स्वाध्यायान्मा प्रमदः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि ।

मा हिंसीः पुरुषान् पशूंश्च । मा गृधः कस्यस्विद् धनम् ।

उत्तिष्ठत । जाग्रत ! प्राप्य वरान् निबोधत ।

एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् ।

## टिप्पणी

गुरुकुले – (ଗୁରୁକୁଳରେ) ପ୍ରାଚୀନ ବୈଦିକଯୁଗର ଶିକ୍ଷାକେନ୍ଦ୍ର ଯେଉଁଠାରେ ଗୁରୁଙ୍କସହ ଶିଷ୍ୟଗଣ ରହି ଶିକ୍ଷାଲାଭ କରୁଥିଲେ ତାହା ଗୁରୁକୁଳନାମରେ ପ୍ରସିଦ୍ଧ ଥିଲା । वेदादिभ्यः शास्त्रेभ्यः – ବେଦ ପ୍ରଭୃତି ଶାସ୍ତ୍ରଗୁଡ଼ିକରୁ (ଜ୍ଞାନ ଓ ଅନୁଶାସନ ସମ୍ବଳିତ ଗ୍ରନ୍ଥଗୁଡ଼ିକରୁ) । सूक्तवाक्यानि – ଉତ୍ତମ ନୀତିବାକ୍ୟଗୁଡ଼ିକୁ । एकं सत् – ଏକମାତ୍ର ସତ୍ ତତ୍ତ୍ୱ । बहुधा – ବହୁ ପ୍ରକାରରେ । ऋतस्य – ସତ୍ୟର ।

**पथा** – ମାର୍ଗରେ । **प्रेत** – ଯାଅ । **अनृतात्** – ମିଥ୍ୟାରୁ । **सत्यमुपैमि** = सत्यम् + उप + एमि(गच्छामि) । **श्रद्धया** –ଆଦରହେତୁ (ହେତୌ ୩ୟା) ।**सत्यम्** –ଉକ୍ତେ କର୍ମଣି ୧ମା ।**आप्यते** –ପ୍ରାପ୍ତ ହୁଏ ।**पुत्रोऽहम्** –ପୁତ୍ରଃ + ଅହମ୍ ।**पृथिव्या:** – ପୃଥିବୀର ।**जागृयाम** – ଜାଗ୍ରତ ହେବା ଉଚିତ ।**चक्षुषा** – ଦୃଷ୍ଟିରେ (କରଣେ ୩ୟା) । **समीक्षामहे** – ଦେଖିବା। **सखा** – ମିତ୍ର । **सख्ये** – ସଂପ୍ରଦାନେ ୪ର୍ଥୀ ।**तन्मे** – ତତ୍ + ମେ ।**शिवसङ्कल्पम्** – ଶୁଭବିଚାରମୟ । **तमस:** – ଅନ୍ଧକାରରୁ (ଅଜ୍ଞାନତାରୁ)।**ज्योति:** – ଆଲୋକକୁ (ଜ୍ଞାନଜ୍ୟୋତିକୁ) ।**आरोह** = ଆରୋହଣକର । **चरैवेति** – ଚର + ଏବ + ଇତି ଅର୍ଥାତ୍ ଅଗ୍ରସର ହୁଅ । **चरन्** – ଚର୍ + ଶତୃ (ଗତି କରୁଥିବା ମନୁଷ୍ୟ) ।**मधु** – ମଧୁ (ଅମୃତ) ।**विन्दति** – ଲାଭକରେ ।**विद्ययामृतमश्नुते** – ବିଦ୍ୟୟା + ଅମୃତମ୍ + ଅଶ୍ନୁତେ – ବିଦ୍ୟାଦ୍ୱାରା ଅମୃତକୁ ଲାଭକରେ ।**स्वाध्यायान्मा** – ସ୍ୱାଧ୍ୟାୟାତ୍ + ମା (ନିଜ ଅଧ୍ୟୟନରୁ) ।**मा** – न (ନାହିଁ) ।**प्रमद:** – ବିରତହୁଅ ।**सत्यान्न** – ସତ୍ୟାତ୍ + ନ । **प्रमदितव्यम्** – ନିବୃତ୍ତ / ବିରତ ହେବା ଉଚିତ ।**भूत्यै** –ସଂପଦ / ନେତୃତ୍ୱ / ସଂପାଳନ / ସଂପୋଷଣ ନିମିତ୍ତ (ନିମିତ୍ତାର୍ଥେ ୪ର୍ଥୀ)।**स्वाध्यायप्रवचनाभ्याम्** – ପଠନ ପାଠନରୁ ।**देवपितृकार्याभ्याम्** – ଦୈବକର୍ମ (ଯଜ୍ଞାଦି) ଓ ପିତୃକର୍ମ (ଶ୍ରାଦ୍ଧତର୍ପଣାଦି)ରୁ । **आचार्यदेवो भव** – ଗୁରୁଙ୍କୁ ଦେବତା ଜ୍ଞାନ କରୁଥିବା ଶିଷ୍ୟଟିଏ ହୁଅ ।**अतिथिदेवो भव** – ଅତିଥିଙ୍କୁ ଦେବତା ଜ୍ଞାନ କରୁଥିବା ଗୃହସ୍ଥଟିଏ ହୁଅ । **अनवद्यानि** – ଅନିନ୍ଦିତ, ଦୋଷଶୂନ୍ୟ ।**सुचरितानि** – ଆଦର୍ଶଚରିତ ।**त्वयोपास्यानि** – ତ୍ୱୟା + ଉପାସ୍ୟାନି = ତୁମେ ଆଚରଣ କରିବା ଉଚିତ ।**नो इतराणि** – ଅନ୍ୟଗୁଡ଼ିକୁ ନୁହେଁ। **मा हिंसी:** – ହିଂସାକର ନାହିଁ । **पशूंश्च** – ପଶୂନ୍ + ଚ ।**कस्यस्विद्** – କାହାର ।**मा गृध:** – ଲୋଭକର ନାହିଁ ।**वरान्** – ଜ୍ଞାନୀମାନଙ୍କୁ। **प्राप्य** – ପ୍ରାପ୍ତହୋଇ ।**निबोधत** – ବୁଝିନିଅ ।

## अभ्यास:

**1. निजभाषया प्रायश: वाक्यत्रयेण उत्तरं लिखत ।**

(क) कस्तावदुपदेश: ? संप्रति एतेषामुपदेशानां कथं प्रासङ्गिकता अस्ति ?

(ख) कुत: न प्रमदितव्यमिति उपदेशा: प्रदत्ता: ?

(ग) कानि कर्माणि सेवितव्यानि उपास्यानि च ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) किं के बहुधा वदन्ति ?

(ख) कस्य पथा प्रेत ?

(ग) कथं सत्यम् आप्यते ?

(घ) का मम माता ?

(ङ) ऋतस्य इति पदस्य कोऽर्थः ?

(च) अहं कस्याः पुत्रः ?

(छ) वयं कुत्र जागृयाम ?

(ज) केन वयं समीक्षामहे ?

(झ) कः सखा न भवति ?

(ञ) मम मनः कथमस्तु ?

(ट) कुतः ज्योतिः आरोह ?

(ठ) कथं मधु विन्दति ?

(ड) कस्यै न प्रमदितव्यम् ?

(ढ) आचार्यदेवः इति पदस्य कोऽर्थः ?

(ण) कान् न हिंसीः ?

(त) कान् प्राप्य निबोधत ?

**3. बन्धनीमध्यात् रेखाङ्कितपदस्य कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) ऋतस्य पथा प्रेत । (मार्गवाचकशब्दयोगे तृतीया, सहार्थे तृतीया, गत्यर्थकधातुप्रयोगे तृतीया)

(ख) श्रद्धया सत्यमाप्यते । (करणे तृतीया, प्रकृत्यादिभ्यः तृतीया, हेतौ तृतीया)

(ग) योन ददाति सख्ये । (दानार्थे चतुर्थी, निवारणार्थे चतुर्थी, रुच्यर्थकधातुयोगे चतुर्थी)

(घ) आरोह तमसो ज्योतिः । (अपादाने पञ्चमी, वारणार्थकधातुयोगे पञ्चमी, ल्यप्लोपे पञ्चमी)

(ङ) विद्यया अमृतमश्नुते । (करणे तृतीया, हेतौ तृतीया, प्रकृत्यादिभ्यः तृतीया)

(च) धर्मात् न प्रमदितव्यम् । (अपादाने पंचमी, भयार्थकधातुयोगे पंचमी, प्रमादार्थकधातुप्रयोगे पंचमी)

(छ) भूत्यै न प्रमदितव्यम् । (निमित्तार्थे चतुर्थी, निवारणार्थे चतुर्थी, सम्प्रदाने चतुर्थी )

(ज) तानि त्वयोपास्यानि । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(झ) मा हिंसीः पुरुषान् पशूंश्च ।

(क्रियाविशेषणे द्वितीया, कर्मणि द्वितीया, गत्यर्थकधातुप्रयोगे द्वितीया ।

(ञ) प्राप्य वरान् निबोधत । (व्याप्त्यर्थे द्वितीया, कर्मणि द्वितीया, कर्मप्रवचनीययोगे द्वितीया ।)

**4. वाक्यनिर्माणं कुरुत ।**

सत्यम्, श्रद्धया, ददाति, अस्तु, धर्मात्, प्राप्य ।

**5. सन्धिविधानं कुरुत ।**

सत्यम् + उपैमि, सत्यम् + आप्यते, चर + एव + इति, स्वाध्यायात् + मा, यानि + अनवद्यानि, पशून् + च, एतत् + अनुशासनम्, एवम् + उपासितव्यम् ।

**6. सन्धिविच्छेदं कुरुत ।**

उपदेशामृतम्, यदनुशासनम्, विज्ञानयुगेऽपि, सद्विप्राः, अहमनृतात्, पुत्रोऽहम्, तन्मे, सत्यान्न, त्वयोपास्यानि, यान्यस्माकम्, एष आदेशः ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत –**

(क) गुरुकुले (गुरोः कुलं तस्मिन्, गुरुः एव कुलं तस्मिन्, गुरुणा कुलं तस्मिन्) ।

(ख) उपदेशः एव अमृतम् (उपदेशामृतेन, उपदेशामृतः, उपदेशामृतम्) ।

(ग) विज्ञानयुगे (कर्मधारयः, द्विगुः, षष्ठी तत्पुरुषः) ।

(घ) विद्यार्थिनाम् (विद्याम् अर्थयन्ते ये तेषाम्, विद्या एव अर्थाः तेषाम्, विद्यायाः अर्थाः तेषाम्) ।

(ङ) आचार्यः देवः यस्य सः (आचार्यदेवता, आचार्यदेवः, आचार्यदेवी) ।

(च) अनवद्यानि (नञ् तत्पुरुषः, निषेधार्थबहुव्रीहि, कर्मधारयः) ।

(छ) सुशिक्षार्थम् (सुशिक्षायाः इदम्, सुशिक्षायै इदम्, सुशिक्षायै इयम्) ।

(ज) वेदोपनिषत् (वेदश्चासौ उपनिषत् च, वेदौ च उपनिषत् च, वेदाश्चासौ उपनिषत् च ) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानं पूरयत ।**

(क) उपदेशः = उप + ———— + घञ् । (दीक्ष् , दिश् , दुष्)

(ख) सूक्ते = सु + ———— + क्त । (उच् , वद् , वच्)

(ग) अनुशासनम् = अनु + शास् + ———— । (शतृ, ल्युट्, शानच् )

(घ) प्राप्य = प्र + आप् + ———— । (क्त, तव्य, ल्यप्)

(ङ) चरन् = चर् + ———— । (क्त्वा, ल्युट्, शतृ)

(च) प्रमदितव्यम् = प्र + मद् + ———— । (तव्य, ल्यप्, क्त्वा)

(छ) प्रवचनाभ्याम् = प्र + वच् + ———— । (ल्युट्, शतृ, शानच्)

(ज) सेवितव्यानि = ———— + तव्य । (सृज् , सेव् , सृ )

(झ) आदेशः = आ + दिश् + ———— । (ल्युट्, शतृ, घञ्)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

आचार्य, गुरु, मनुष्य, पुत्र, पुरुष, सत्, सखि ।

■